Civil Services (Main)
Examination- 2025

**SLPM-C-SNKT**

# संस्कृतम् / SANSKRIT

## ( अनिवार्यम् ) / ( Compulsory )

समय : **होरात्रयम्** (घण्टा – **त्रयम्**)
*Time Allowed : **Three** Hours*

पूर्णाङ्का: : **300**
*Maximum Marks : **300***

---

**प्रश्नपत्रविषये विशेषनिर्देशा:**

***प्रश्नानां समाधानात् प्राक् सर्वेऽपि अधोलिखिता: निर्देशा: सावधानतया पठनीया:***

सर्वेऽपि प्रश्ना: समाधेया: ।

प्रत्येकं प्रश्नस्य / प्रश्नभागस्य अङ्का: तत्पुरत एव निर्दिष्टा: ।

यदि अन्यथा निर्देशो न भवेत् तर्हि प्रश्नानाम् उत्तराणि **संस्कृतभाषया** एव देवनागरीलिपिनिबद्धया लेखनीयानि ।

यत्रापि शब्दसीमा निर्धारिता तत्र सा अनुपालनीया एव । उत्तराणि चेत् सीमात: अधिकमात्रया विस्तीर्णानि लघुत्तराणि वा भवेयु: तदा अङ्कहानि: भविष्यति ।

प्रश्नपत्रसहितोत्तरपुस्तिकाया: किमपि पृष्ठं पृष्ठांशो वा यदि रिक्त: त्यज्यते स: अवश्यं स्पष्टतया रेखाचिह्नेन निरसनीय: ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । नोचेत् अंशत: प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् भवेत् ।

**Question Paper Specific Instructions**

***Please read each of the following instructions carefully before attempting questions :***

*All questions are to be attempted.*

*The number of marks carried by a question / part is indicated against it.*

*Answers must be written in **SANSKRIT** (Devanagari script) unless otherwise directed in the question.*

*Word limit in questions, wherever specified, should be adhered to and if answered in much longer or shorter than the prescribed length, marks may be deducted.*

*Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.*

*Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly.*

---

**Q1.** **निम्नलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य षट्शतशब्दैः (600 परिमितशब्दैः) निबन्धो लेखनीयः** *100*

(a) भारतीयज्ञानपरम्परायाः प्रासङ्गिकत्वम्

(b) विश्वयुद्धस्य गभीरताम् आपद्यमानः संकटः

(c) अङ्कीय मूल्यदानस्य (Digital Payment) लाभाः

(d) क्रीडासु भारतीयमहिलाजनानां प्रवर्धमानं सहभागित्वम्

**Q2.** **अधोलिखितं गद्यांशं सावधानं पठित्वा तदनुसारम् अधः प्रदत्तानां प्रश्नानामुत्तराणि स्पष्टतया उत्तर समासतश्च शुद्धगिरा दीयन्ताम् :** *12×5=60*

जैवविविधता (Biodiversity) विश्वस्य जीवितप्रजातीनां विविधता अस्ति। अस्यां विविधतायां प्रजातीनाम् आनुवंशिकी विविधता तत्प्रणीत-पारिस्थितिकी-तन्त्रस्य (Eco system) समुदायाः समाविष्टाः भवन्ति। अद्य जीवनस्य इयं विविधता गभीरं संकटं संमुखं पश्यति। वैज्ञानिका सम्प्रवदन्ते यत् यया गत्या वर्तमानकाले उष्णकटिबन्धीय वनानां (Tropical Forest) हानिः अस्थैर्यं च दृष्टिपथम् आगच्छतः यदि सा गतिः तथैव प्रवर्तते तर्हि आगामि-पञ्चविंशति-वर्षेषु प्रतिदशवर्षं सर्वासाम् उष्णकटिबन्धीय वनप्रजातीनां मध्ये प्रायः पञ्चलः दश प्रतिशतं यावत् विलुप्तिम् आप्स्यति।

विलोपनस्य संकटः केवलम् उष्णकटियबन्धीय वनानि यावदेव परिमितः नास्ति। नदीनाम् अवरोधस्य वैदेशिक प्रजातीनाम् आगमनस्य च कारणात् मिष्टजलस्य प्राकृतिकभाण्डारेषु नाटकीयतया परिवर्तनं घटमानम् अवलोक्यते। इमाः विगतानेक सहस्रेभ्यः जायमानाः विलुप्तयः समुद्रद्वीपेषु अदृश्यन्त। ते समुद्रद्वीपाः एव अधुना पृथिव्यां सर्वाधिक-भीषण-संकटापन्नेषु पारिस्थितिकीयतन्त्रेषु अन्यतमाः सन्ति।

प्रजातीनाम् अथ च आनुवंशिक विविधतानां हानिः, प्राकृतिकवासस्य अथ च पारिस्थितिकीयतन्त्राणां क्षयः – एतत्सर्वं एतत्कालवर्तिनां जनानां भविष्यति काले लब्धजन्मनां जनानां च कृते समुपस्थितां महतीं हानिं द्योतयति। अद्य या प्रजातिः विलुप्यमाना वर्तते तस्याम् अज्ञातः कश्चन खाद्यसम्बन्धी औषधिसम्बन्धी उद्योगसम्बन्धी च उपयोगः निहितः वर्तते। पारिस्थितिकीयतन्त्रेषु निहिता मानव जनसंख्यासंरक्षणसम्बन्धिनी शक्तिः अद्य विलीयमाना वर्तते। तेषाम् अवमूल्यनं च मृत्तिकाक्षयस्य जलाशयानां लावण्यस्य स्थानीयजलपरिवर्तनस्य मरुस्थलीकरणस्य उत्पादनप्रवृत्तेः क्षस्य च माध्यमेन ततोऽप्यधिकाः हानीः आमन्त्रयति।

जैविकसंसाधनानां मूल्यस्य निर्धारणाय त्रयाणां मुख्यदृष्टिकोणानाम् उपयोग: क्रियते । उपभोग-उपयोग-मूल्याङ्कने दहनकाष्ठ-पशुभोजन-मृगयोपलब्धमांसप्रभृतीनां साक्षात्प्राप्य भोज्यानां पदार्थानाम् आकलनं समाविष्टं भवति। एतेषाम् उपयोग: आपणं विनैव भवति। उत्पादक-उपभोग-मूल्याङ्कने तेषाम् उत्पादानां मूल्यस्य आकलनं भवति येषां वाणिज्यदृष्ट्या कर्तनं विक्रयणं च भवति । यथा काष्ठम्, मत्स्य: मांसम्, मधु औषधीया: पादपा: इत्यादीनाम्। उपभोगेतर-उपयोग-मूल्याङ्कने पारिस्थितिकीयतन्त्रस्य कार्याणां, यथा जलसंचयक्षेत्रसंरक्षणं, प्रकाशसंश्लेषणं जलवायुविनियमनम् अथ च मृदोत्पादनस्य प्रत्यक्षमूल्यानाम् आकलनं समाविष्टं भवति । अनेनैव सह अयं सुखबोधोऽपि अत्र समाविष्ट: वर्तते यत् कतिचन प्रजातय अधुनापि अवशिष्टा: सन्तीति।

नीतिनिर्मातार: प्राय: उत्पादक-उपयोग-मूल्यानाम् अधिकं प्रशंसां कुर्वन्ति। किमर्थम् इति चेत्, तानि हि वानिकी-मत्स्यपालन प्रभृतिभि: बृहदुद्योगै: सम्बद्धानि भवन्ति । अतएव च हेतो: तानि राष्ट्रिये आये परिलक्षितानि भवन्ति।

(a) जैवविविधताया: तात्पर्यं किम् अस्ति ? *12*

(b) विलुप्तताया: संकट: क: अस्ति ? *12*

(c) प्रजातीनाम् आनुवंशिकविविधतानां च हानित: के संकटा: उत्पद्यन्ते ? *12*

(d) उपभोगेतर-उपयोग मूल्याङ्कनस्य आशय: विशदीक्रियताम्। *12*

(e) नीतिनिर्मातार: कस्य मूल्याङ्कनस्य सर्वाधिकं प्रशंसां कुर्वन्ति किमर्थम् च ? *12*

**Q3. अधोवर्तिगद्यांशस्य संक्षेपो मूलभागस्य तृतीयांशपरिमित: स्वशब्दै: लेख्य: । शीर्षको न प्रदेय: । संक्षेपो स्वशब्दै: लेख्य: ।** ***60***

यदि वयं ज्ञातुम् इच्छाम: किं नामेयं प्रसन्नतेति तर्हि नायं विषय: अस्माभि: कस्मिंश्चित् कल्पनालोके अवलोकनीय: । परम् अयं विषय: अस्माभि: तेषु मनुष्येषु मध्ये अन्वेषणीय: ये समृद्धं पूर्णं च जीवनं जीवन्त: सन्ति । यदि भवन्त: कञ्चन वस्तुगत्या प्रसन्नं पुरुषं पश्यन्ति तर्हि नूनं भवन्त: प्राप्नुवन्ति सोऽयं पुरुषविशेष: नाव: निर्माणे रन: अस्ति, स्वररचनाकर्मणि मग्न: वर्तते, स्वपुत्रं पाठयन् वर्तते अथ च स्ववाटिकायां सुन्दराणि पुष्पाणि कुर्वन् रमते । अयं पुरुष: प्रसन्नतां दुर्लभवस्तुत्वेन न पश्यति यत् कदाचित् प्राप्यं भवति कदाचित् अप्राप्यं भवति । अयं जानाति स: होराणां चतुर्विंशति प्रसन्न: वर्तते; आदिनं प्रसन्न: वर्तते; कमुसु व्याप्तत: अपि प्रसन्न: वर्तते।

न कोऽपि पुरुषः तथाविधे कर्मणि प्रसन्नतां प्राप्तुं शक्नोति यत् साकल्येन तस्य स्वकीये व्यक्तित्वे एव केन्द्रितम् अस्ति, अथ च यस्य कर्मणः सम्बन्धः कर्तुः तात्कालिक्याः आवश्यकतायाः पूर्त्यै सह एव भवति । एवमेव न कोऽपि पुरुषः तद्विधेषु सामाजिकसम्बन्धेषु पूर्णां प्रसन्नतां प्राप्तुं शक्नोति येषां सम्बन्धानां निधानं केवल स पुरुषः एव वर्तते । ये सम्बन्धाः तस्य सीमितव्यापारानेव व्याप्य वर्तन्ते । ये वा सम्बन्धाः तस्य संकीर्ण परिधीन् एव केन्द्रीभूतान् कुर्वन्ति । प्रसन्नतायाः प्राप्त्यर्थम् अस्माभिः स्वस्याद् बहिः तस्याः अन्वेषणं कर्तव्यम् ।

यदि भवन्तः केवलं स्वप्रयोजनायैव जीवन्ति तर्हि भवन्तः सदा स्वविचाराणां स्वरूचीनां च आवृत्तिमये मृत्युवन्नीरसभूते तात्कालिके संकटे जीवन्ति । भवन्तः महतीं मानवीय प्रसन्नतां लक्ष्यीकृत्य अवसरं प्राप्य तया सह आत्मानं सयुक्तं कुर्वन्तु । 'जीवनस्य अर्थः कः' इति ज्ञातुं मानवः तावत् पर्यन्तं समर्थः न भवति यावत् पर्यन्तं सः सहवर्तिनां मनुष्याणां सेवायै आत्मनः अहङ्कारं न समर्पयति । यदि आत्मनः महत्त्वाकाङ्क्षायाः विषये भवताम् अभिमानम् अस्ति तर्हि भवन्तः तस्याः लक्ष्याणाम् एकां मानसिकीं सूचीं निर्मान्तु । भवन्तः तदा आत्मानं पृच्छन्तु, किं भवन्तः तानि वैयक्तिकलक्ष्याणि प्राप्तुम् अथ च तद्रीत्या प्रसन्नतायाः आत्मनः अवसरान् गमयितुम् इच्छन्ति ? अथवा भवन्तः प्रसन्नाः भवितुम् इच्छन्ति स्वाहङ्कारार्जितां प्रतिष्ठां त्यक्तुमिच्छन्ति ।

ये मनुष्याः प्रभूतां प्रसन्नताम् अधिकतरां सफलतां च वाञ्छन्ति तेषां कृते जीवनस्य एकमेव दर्शनं भवितुमर्हति – रचनात्मक-परोपकारितायाः दर्शनम् । यः पुरुषः वस्तुगत्या प्रसन्नः अस्ति स सदा दृढमाशान्वितः तिष्ठति । आशावादे न केवलं परोपकारित्वमेव अन्तर्भवति परम् अस्मिन् सामाजिकदायित्वं सामाजिकः साहसः वस्तुनिष्ठता चाप्यन्तर्भवन्ति । अस्यां श्रेण्यां ते स्त्रीपुरुषाः समाविष्टाः भवन्ति ये जीवनं दृढं स्वीकुर्वन्ति, वयस्का इव वस्तुस्थितिं संमुखीभूय गृह्णन्ति, स्थैर्येण काठिन्यम् अपाकुर्वन्ति, ज्ञानं करुणया समन्वितं कुर्वन्ति, सोत्साहं स्वजीवनं हास्यभावनया सह योजयन्ति । एकेन शब्देन ब्रूमश्चेत् – ते हि सम्पूर्णाः मनुष्याः भवन्ति । श्रेष्ठं जीवनं मानवसेवायाः सक्रियं दर्शनम् आकाङ्क्षति । इत्मेव सन्तोषकरं जीवनमस्ति । अयमेव मानुषत्वेऽपि प्रसन्नतायाः अद्वितीयः पन्थाः अस्ति ।

प्रसन्नतायाः तत्त्वानि तथा सरलानि भवन्ति यथा एकस्मिन् हस्ते तेषां गणना संभवति । प्रसन्नता स्वान्तस्तः आगच्छति । इयं हि सरले साधुत्वे स्वच्छे आत्मनि च निहिता तिष्ठति । अस्य कृते धर्मः आवश्यकः नास्ति । परं नैतिकसिद्धान्तान् आधृत्य प्रवर्तमानं दर्शनमन्तरेण कोऽपि एनां प्राप्तुं न शक्नोति ।

स्वार्थपरता अस्याः शत्रुः अस्ति । अन्येषां प्रसन्नतायामेव आत्मनः प्रसन्नता अस्ति । कदाचिदेव जनसम्मर्देषु इयम् उपलभ्येत । ऐकान्त्यस्य चिन्तनस्य वा क्षणेषु अस्याः उपलब्धिः सहजं भवति । अस्य क्रयः न सम्भवति । वस्तुतस्तु अस्य धनेन सम्बन्धः नास्त्येव ।

यावत्पर्यन्तं नरः स्वान्मनि सन्तुष्टः नास्ति तावत्पर्यन्तं सः प्रसन्नः न भवितुमर्हति । तस्मात् शान्तेः अन्वेषणम् अनिवार्यतः आत्मपरीक्षणादेव आरंभणीयम् । अत्र करणीयं बहु अस्ति । अल्पमेवात्र कृतम् उपलभ्यते तथापि गहने अस्मिन् आत्मविश्लेषणे तेषां गुणानामन्वेषणम् आश्रितं तिष्ठति ये प्रत्येकं जनं विशिष्टं कुर्वन्ति । तेषां गुणानां विकासेनैव सन्तोषः लभ्यते । तस्माद् यदि कोऽपि प्रसन्नतायाः प्राप्तये कार्यक्रमम् आकारयितुमिच्छति तर्हि ते कार्यक्रमाः एवं भवन्ति – सीमितेषु साधनेषु सन्तोषः, विलासितायाः परित्याग-पुरस्सरं शिष्टतायाः आधानम्, फैशनस्य स्थानै परिष्कारः, योग्यतायाः प्राप्तिः, गभीरम् अध्ययनम्, शान्तं चिन्तनम्, मधुरमालपनम् उन्मुक्तं कर्म, नक्षत्राणां पक्षिणां शिशूनाम् ऋषीणां च स्वरध्वनेः उन्मुक्तमनसा श्रवणम् प्रसन्नतापुरस्सरं सर्वान् प्रति सहिष्णुताभावः, द्रुततायाः अभावः, सामान्यजीवनस्य मध्ये आध्यात्मिकस्य अनापेक्षितस्य अचेतनस्य च विकासदर्शनम् । इत्यत्र अवधेयम् । न कोऽपि सर्वकारः भवतां कृते इदं कर्तुं समर्थः अस्ति । एतत्सर्वं भवता स्वहितकामेन स्वयमेव आचरणीयम् ।

*(517 शब्द)*

**Q4. अधोलिखितगद्यांशस्य आंग्लभाषया अनुवादः करणीयः –** ***20***

आतङ्कवादः समग्रेऽपि विश्वे मानवतायै विभीषिकाकेन्द्रं सञ्जातः अस्ति । अमेरिका-भारत-इजरायल-प्रभृतयः देशाः आतङ्कवादस्य व्यूहाद् बहिः आगन्तु संघर्षरताः वर्तन्ते । परमिदं चक्रं निरन्तरं दृढायमानं दृश्यते । अनुदिनं वृत्तपत्राणां मुख्यपृष्ठेषु बृहद्भिरक्षरैः आतङ्कवादिनां विशालानि घृणास्पदानि कृत्यानि प्रकाशितानि भवन्ति । एभिः भयप्रदैः वृत्तैरेव दिनस्य आरम्भः भवति । न जानीमहे एते आतङ्कवादिनः कियतः निर्दोषान् जनान् स्व-स्वार्थे कवलितान् कुर्वन्ति ।

स्वाधीनतायाः अनन्तरमेव केचन जनाः भारतदेशे आतङ्कवादस्य बीजवदनं कृतवन्तः । तस्य मूलानि अधुना समग्रेऽपि देशे तथा विस्तृतानि जातानि सन्ति यथा स्थितिः अत्यन्तं शोचनीया संवृत्ता अस्ति । काश्मीरेषु आतङ्कवादः विभीषिकामय्याम् अवस्थायां वर्तते । तत्रत्याः मूलनिवासिनः सम्प्रति शरणार्थिनः इव

तत्र जीवन्ति। प्रत्येकं दिनं तत्र भयमये वातावरणे व्यतीतं भवति न जाने अद्य किम् आपतिस्यतीत्येवंरूपेण। न केवलं काश्मीरान् एव परम् असम-बंग-नागालैण्ड प्रभृतीन् प्रदेशान् अपि आतङ्कवादिनः आतङ्कितान् कुर्वन्तः वर्तते। एतेषु सर्वेषु प्रदेशेषु विधिव्यवस्था त्रासिता वर्तते। सेना पुलिसतन्त्रं च एतां समस्यां दूरीकर्तुं स्वजीवनं प्रदाय लग्नं वर्तते। आतङ्कवादस्य दूरीकरणार्थं सर्वकारः अनेकान् उपायान् करोति। परमत्र जनसाधारणस्यापि सहयोगः आवश्यकः वर्तते। यदि सर्वे स्वीयानि धार्मिकाणि च स्वार्थजातानि प्रान्तीयान् भावान् च परित्यज्य भारतवासिनः सन्तः जीवेयुः तर्हि इयं समस्या सततं समाप्ता स्यात्। न कोऽपि मनुष्यतावान् अपरं मनुष्यं हानिना योजमेत्। पशुता हि किल आतङ्कवादः। सर्वे ऐक्यमत्यम् आश्रित्य संगठिताः सन्तः एतां समस्यां विश्वतः समापयितुं सहयोगिनः भवेयुः अथ च विश्वे शान्तेः सौहार्दस्य च भावनां स्थापयेयुः। तदैव देशः समाजश्च प्रगतिपथं प्रति पूर्णतया अग्रेसरौ भवितुमर्हतः।

**Q5.** **अधस्तनगद्यांशस्य संस्कृतभाषानुवादः करणीयः –** ***20***

Healthy children are an essential component of an effective education system. Good health reduces absenteeism and dropouts and increases scholastic performance. An effective school health programme is one of the most cost-effective approaches in improving community health. School health activities contribute to healthy lifestyles, thus leading to a healthy future generation. School children also communicate the health-related information gained in schools to their families and neighbourhood, contributing to improved family and community health. The functions of school health services include detection and treatment of defects, creation and maintenance of hygienic environment in and around the school, provision of school meals, and improvement of nutritional status of children. This may be further enlarged to include health check-ups and immunisation campaigns.

**Q6.** **(a)** **अधोलिखितानां स्वरचितेषु वाक्येषु प्रयोगः कार्यः –** *2×5=10*

(i) अलम् *2*

(ii) सम्प्रति *2*

(iii) इतस्ततः *2*

(iv) उच्चैः *2*

(v) वृथा *2*

**(b)** **पदसाधनं क्रियताम् :** *1×10=10*

(i) पितृ + षष्ठी, एकवचनम् *1*

(ii) मति + द्वितीया, बहुवचनम् *1*

(iii) वारि + चतुर्थी, एकवचनम् *1*

(iv) तपस् + प्रथमा, एकवचनम् *1*

(v) देव + तृतीया, बहुवचनम् *1*

(vi) अस् + लोट्, प्रथमपुरुषे, द्विवचनम् *1*

(vii) दा + लट्, प्रथमपुरुषे, बहुवचनम् *1*

(viii) दृश् + लृट्, मध्यमपुरुषे, द्विवचनम् *1*

(ix) श्रु + विधिलिङ्ग, उत्तमपुरुषे, एकवचनम् *1*

(x) इष् + लट्, मध्यमपुरुषे, बहुवचनम् *1*

**(c)** **समासो विधेयः समासनाम च लेखनीयम् :** *2×5=10*

(i) कृष्णं श्रितः *2*

(ii) सिंहात् भयम् *2*

(iii) कृष्णस्य समीपम् *2*

(iv) पाणिपादम् *2*

(v) अधीतव्याकरणः *2*

**(d)** **अधोलिखितानि वाक्यानि शुद्धीकरणीयानि :** *2×5=10*

(i) देवा: कृष्णं पश्यति। *2*

(ii) अध्यापका: छात्रात् क्रुध्यति। *2*

(iii) वानरा: अश्वेन सह गच्छाम:। *2*

(iv) गुरु आसने अधिष्ठन्ति। *2*

(v) त्वं अहं दृष्ट्वा हसन्ति। *2*